याज्यान्तः । (९०/३६०९)

याज्या नाम ये याज्याकाण्डे पठ्यन्ते मन्त्राः, तेषामन्त्यो यः टिः स प्लवते यज्ञकर्मणि । 'स्तोर्मविधे[1]माग्नये३' (ऋ. ८.४३.११)[2] । [3]'जिह्वामग्ने चकृषे [4]हव्यवाह३म्' (तै. ४.४.४.१) । अन्तग्रहणं किम् ? याज्या नाम ऋचः काश्चिद्[5]वाक्यसमुदायरूपाः, तत्र यावन्ति वाक्यानि [6]तेषां सर्वेषां टेः प्लुतः प्राप्नोति । सर्वान्त्यस्यैव इष्यते, तदर्थमन्तग्रहणम् ॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । (९१/३६१०)

ब्रूहि प्रेष्य श्रौषट् वौषट् आवह [7]इत्येतेषामादेः प्लुतो भवति यज्ञकर्मणि । 'अग्नयेऽनुब्रू३हि' (श. ब्रा. २.५.३.१२) । प्रेष्य – अग्नये गोमयान् प्रे३ष्य । श्रौषट् – 'अस्तु श्रौ३षट्' (तै. १.६.११.१) । वौषट् – 'सोमस्य वीहि वौ३षट्' (ऐ. ब्रा. ४.५.४.६) । आवह – 'अग्निमा३वह' (तै. ब्रा. ३.५.१.२) । 'आवह देवान् यजमानाय' (तै.ब्रा. ३.५.३.२) इत्येवमादावयं प्लुतो न भवति, 'सर्वे विधयः छन्दसि विकल्प्यन्ते' (पु.प. ३५) इति ॥

अग्नीत्प्रेषणे परस्य च । (९२/३६११)

अग्नीधः प्रेषणम् अग्नीत्प्रेषणम् । [8]तत्रादेः प्लुतो भवति परस्य च । आ३ श्रा३वय (तै. १.६.११.२) । ओ३ श्रा३वय । अत्रैवायं प्लुत इष्यते । तेन इह न भवति, 'अग्नीदग्नीन् वि हर बर्हिः[9]स्तृणाहि' (तै. ६.३.१.२) इति । तदर्थं केचिद् वक्ष्यमाणं विभाषा इत्य[10]भिसम्बध्नन्ति, सा च व्यवस्थितविभाषा इति । अपर आह – 'सर्व एव प्लुतः साहसमनिच्छता विभाषा [11]विज्ञेयः' (म.भा. ३.४२०) इति । इह तु, उद्धर३ उद्धर, अभिहर३ अभिहर इति छान्दसः प्लुतव्यत्ययः[12] । [13]यज्ञकर्मणि इत्येव, ओ श्रावय[14] ॥

विभाषा पृष्टप्रतिवचने हेः । (९३/३६१३)

पृष्टप्रतिवचने[15] विभाषा [16]हेः प्लुतो भवति । अकार्षीः कटं देवदत्त ? अकार्षं हि३, अकार्षं हि । अलावीः केदारं देवदत्त ? अलाविषं हि३, अलाविषं हि । पृष्टप्रतिवचने इति किम् ? कटं [17]करिष्यति हि । हेः इति किम् ? [18]करोमि ननु ॥

निगृह्यानुयोगे च । (९४/३६१३)

स्वमतात् प्रच्यावनं निग्रहः । अनुयोगः तस्य मतस्य आविष्करणम् । तत्र निगृह्यानुयोगे यद् वाक्यं वर्तते

---

1. अग्नया३ ड. 2. इति इत्यधिकम् क. 3. जिह्वामग्रे ड. 4. हव्यवाहाम् मुद्रित पाठः 5. वाक्यसमुदायः ह. 6. सम्भवन्ति इत्यधिकम् ह. 7. इत्येतेषां प्लुतो भवति य. 8. तस्मादेवादिप्लुतान् इ, तस्मादेव आदेः क. 9. तृणीहि मुद्रितः पाठः 10. सम्बन्धयन्ति ब. 11. विज्ञायते ब. 12. द्रष्टव्यः इत्यधिकम् इ. क. ह. 13. वाक्यमिदं नास्ति इ.क.ब. 14. आ श्रावय इत्यधिकम् ह. 15. अर्थे इत्यधिकम् क. इ. 16. हि इत्येतस्य क.इ.ह. 17. करिष्यसि ब. 18. कटं करोमि ह.